International Conference on Recent Developments in Science, Engineering, Management, and Humanities (ICRDSEMH -2023)
22nd October, 2023, Hyderabad, Telangana, India.

CERTIFICATE NO : ICRDSEMH /2023/C1023829

# ऋक्प्रातिशाख्य-वाजसनेयिप्रातिशाख्ययोस्तुलनात्मकं समीक्षणम्

# A Comparative Study on Varnasamamnaya-Varnoccaranavidhi between Rikprātiśākhya and Vajasaneyipratishakhya

**Arpita Das**

Research Scholar, Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India.

**संक्षिप्तसारः** - विश्वस्य प्राचीनतमा हृदयग्राहका, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा । वैदिक-संस्कृतभेदेन सा द्विधा । तयोर्वैदिकभाषा एव प्राचीना । ऋक्-साम-यजुः-अथर्वभेदेन वेदस्य खलु चातुर्विध्यं प्रतिपादितमृषिभिः ।

***ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च*** इति श्रुतिवाक्यानुसारेण षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्चेति । अङ्गं नामोपकारकः । अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि । यानि वस्तूनि वेदानां स्वरूपज्ञाने सहायकानि भवन्ति तान्यङ्गानि कथ्यन्ते । षड्वेदाङ्गानि तत्र सन्ति । तानि तु – शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दः-ज्योतींषि चेति । उक्तम् - ***शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां च यः । ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥*** इति ।

यद्यपि षट्सु वेदाङ्गेषु प्रातिशाख्यस्यान्तर्भुक्तिर्न स्यात्तथापि ग्रन्थोऽयं वैदिकसाहित्यजगति शिक्षावेदाङ्गवदपरिहार्य इति निश्चप्रचं वक्तुं युज्यते । प्रतिशाख्यग्रन्थेनापि वेदमन्त्रस्य छन्दः-मात्रा-उच्चारणप्रक्रिया-स्वर ादीनां ज्ञानं लभते । प्रतिवेदस्य शाखाभेदेन बहवः प्रातिशाख्यग्रन्थाः सन्ति । तद्यथा – क) ऋग्वेदस्य शाकलशाखान्तर्गतम् *ऋग्वेद-प्रातिशाख्यम्* ख) सामवेदस्य कोथुमशाखान्तर्गतम् *ऋक्तन्त्रम्* ग) कृष्णयजुर्वेदस्य तैत्तिरीयशाखान्तर्गतं *तैत्तिरीयप्रातिशाख्यम्* घ) शुक्लयजुर्वेदस्य माध्यन्दिनशाखान्तर्गतं *वाजसनेयिप्रातिशाख्यम्* ङ) अथर्ववेदस्य *शौनकीया चतुरध्यायिका* इत्यादयः ।

यद्यपि नाम्नि एकता दृश्यते *प्रातिशाख्यम्* इति तथापि वेदस्तु पृथक् पृथक् । अत एव आधारो यथा पृथक् तथा आधेयोऽपि पृथक् भवतीति कृत्वा ऋग्वेगस्य शाकलशाखान्तर्गतेन *ऋग्वेद-प्रातिशाख्येन* सह शुक्लयजुर्वेदस्य माध्यन्दिनशाखान्तर्गतस्य *वाजसनेयिप्रातिशाख्यस्य* वर्णसमाम्नाय-वर्णोच्चारणविधि-वर्णोच्चारणकालविषये तुलनात्मकसमीक्षा एवास्य गवेषणापत्रस्य विषय इति शम् ॥

**सूचीमुखशब्दाः : संक्षिप्तसारः, अवतरणिका, ऋक्प्रातिशाख्यस्य परिचयः, वाजसनेयिप्रातिशाख्यस्य परिचयः, उभयप्रातिशाख्यस्य वर्णसमाम्नायः, उभयप्रातिशाख्यस्य वर्णोच्चारणविधिः, उभयप्रातिशाख्यस्य वर्णसमाम्नाय-वर्णोच्चारणविधिविषये तुलनात्मकं समीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी**